श्रीलब्धिसूरीश्वरजैनग्रन्थमालायाः पुष्पं [ १६ ]

श्रीजैनसंस्कृतग्रन्थलतायाश्चतुर्थो गुच्छकः ।

राजगच्छीयश्रीमानतुङ्गसूरिविरचितश्रेयांसनाथचरितादुद्धृतम्-

# अपराजितकथानकम् ।

प्रकाशयित्री

श्रीलब्धिसूरीश्वरजैनग्रन्थमाला-गारीआधार ( काठीयावाड )

वीरसं. २४७३ विक्रमसं. २००३ आत्मसं. ५१ सन् १९४७

प्रतीनां पञ्चशतम् ]

[मूल्यं [illegible]ः આના

# अमारां संस्कृत ग्रन्थलतानां गुच्छको.

## (१) श्रीसिद्धहेमलघुवृत्तिः अवचूरि परिष्कार सहित.

संस्कृत व्याकरणना रहस्य ज्ञान माटे मूलसूत्रानुसार वृत्तिने सूक्ष्मताथी समजावतो ने सुलभ बोध करावतो परिष्कार लघुवृत्तिना भणावनार अने भणनार उभयने अत्यंत उपयोगी छे. प्रक्रिया क्रम जेवी व्युत्पत्ति करावे छे. सूत्रोमांथी उद्भवता न्यायो उदाहरणो ने प्रत्युदाहरणोनो समन्वय बताववा साथे ग्रन्थकारना हार्दने स्पष्ट करतो आ परिष्कार उत्तम मार्गदर्शन आपे छे. आ अपूर्व प्रकाशननुं संस्करण तद्दन नूतन शैलीमां होवाथी विद्वद्भोग्य बन्युं छे. सात अध्यायना रुपीया साडा सत्तर भरी प्रथमथी ग्राहक बननारने प्रत्येक पाद छपाशे तेम मोकलवामां आवशे. प्रथम अध्याय तैयार छे. किम्मत अढी रुपीया. पांचमुं पाद टूंक समयमां बहार पडशे.

## (२) श्री चैत्यवंदनस्तुतिचतुर्विंशति ।

पूज्यपाद कविकुलकिरीट व्याख्यानवाचस्पति आचार्यदेव श्रीमद्विजयलब्धिसूरीश्वरजी महाराज विरचित आ पुस्तकमां श्री ऋषभदेवादि जिनेश्वरोनां चैत्यवंदन अने स्तुतिओ विविध छंदोमां आपवामां आवी छे. मूल्य : आठ आना

## (३) सकलार्हत्स्तोत्रं ।

कलिकालसर्वज्ञश्रीहेमचन्द्रसूरीश्वरविरचित स्तोत्र श्रीगुणविजयजी विरचित अर्थप्रकाशनामक वृत्तिथी विभूषित. मूल्य : छ आना

---

Printed by Ramchandra Yesu Shedge, at the "Nirnaya-sagar" Press, 26-28, Kolbhat Street, Bombay.

Published by Shah Umedchand Raichand; Manager–Shree Labdhisurishwar Jain Granthmala; Gariyadhar. (via Damnagar, Kathiawar).

॥ अर्हम् ॥

श्रीआत्म-कमल-लब्धिसूरीश्वरेभ्यो नमः ।

राजगच्छीयश्रीमानतुङ्गसूरिविरचित-श्रेयांसनाथ-चरितादुद्धृतं-

# अपराजितकथानकम् ।

अश्रमः श्रमणश्राद्धवृषपोषमनीषया । कुन्तलच्छलदूर्वालिशालिस्कन्धोऽवताज्जिनः ॥ १ ॥ अगाद्यदङ्कगः खड्गी मृगेषूदग्रशृङ्गताम् । विश्राणयतु स श्रेयः श्रेयांसः श्रेयसां निधिः ॥ २ ॥

जयन्तीत्यस्ति नगरी जयन्ती स्वःपुरीं श्रिया । तत्रास्ति भूमिषु स्थामा विजयी जयशेखरः ॥३॥ तस्य चास्ति महादेवी नामतो गुणसुन्दरी । तयोर्यान्ति सुखमया दिवसा देवयोरिव ॥ ४ ॥ सान्यदा फलितं चूतं स्वप्ने प्रेक्ष्य व्यबुध्यत । आख्यच्च राज्ञे स प्राह सुपुत्रस्ते भविष्यति ॥ ५ ॥ विनीतात्मा स राज्यस्य धौरेयश्च भविष्यति । एवमस्त्विति सा प्रोच्य शकुनग्रन्थिमाददे ॥ ६ ॥ तस्थौ च जाग्रती देवगुरुस्मृतिपरायणा । प्रभातसमये चैत्यपाठीन्मङ्गलपाठकः ॥ ७ ॥ सूर्योदयेऽधुना देव! ययुराशाः प्रकाश्यताम् । तत्कल्पानि कार्याणि कुरु सम्प्रति भूपते! ॥ ८ ॥ दध्यौ नृपः प्रियास्वप्नसम्बद्धं बन्दिनो वचः । कृत्वाथ नित्य-

---

१ बलवान् ।

अपरा-
जित—

॥ २ ॥

कृत्यान्याजुहाव स्वप्नपाठकान् ॥ ९ ॥ बहुमानेन सन्मान्य तेभ्यः स्वप्नं न्यवेदयत् । ते प्राहुर्भविता देव ! सुतः सर्वगुणैर्युतः ॥१०॥ तथाहि त्यागवान् भोगी गम्भीरो विनयी नयी । शूरो वीरो महाधर्मी परोपकरणोद्यतः ॥ ११ ॥ तानाह नृपतिस्तुष्टो गजाश्ववसनं वसु । यद्गृहीतुमहोरात्रात् क्षमा गृह्णीत तत् स्वयम् ॥ १२ ॥ तैरूचे वितरस्युच्चैर्यदेवं देव ! नः प्रति । भविष्यतः सुतस्यानुसारतस्तदियं मतिः ॥ १३ ॥ रत्नगर्भेव देवी तद्गर्भरत्नमपालयत् । अभूच्च तत्प्रभावेण वल्लभा भूभुजोऽधिकम् ॥१४॥ अपूरयन्नृपस्तस्या दौहृदं धृतसौहृदम् । समये परिपूर्णे च सुतरत्नमसौदसौ ॥ १५ ॥ नृत्यद्विलासिनीवर्गत्रुट्यन्मुक्ताकलापकम् । आनन्दकन्दलीकन्दं वर्द्धापनमजायत ॥१६॥ मास्यतीतेऽस्य बालस्य नाम चक्रेऽपराजितः । न पराजेष्यते केनाप्ययमित्थं दधन्नृपः ॥१७॥ धात्रीभिः पञ्चभिर्लाल्यमानोऽवर्द्धिष्ट स क्रमात् । कलाचार्यादकलयत्स कलाः सकला अपि ॥१८॥ अथ तारुण्यभाजोऽस्य दृष्टिर्द्वैधापि विस्तृता । विक्रमेण समं वक्षःस्थलं विपुलतां श्रितम् ॥ १९ ॥ अवर्द्धत बलं बाह्वोरुत्साहेन सहाधिकम् । दधुरङ्गानि लालित्यं भारत्याः कलया सह ॥ २० ॥ समं जनानुरागेण रागोऽभूत्करयोरपि । विवेकेन सहोल्लासं देहकान्तिरवाप च ॥ २१ ॥ कलाकलापकलितः सुरूपो विनयान्वितः । जनानामपि जज्ञे स प्रियो जनिकृतो यथा ॥२२॥ पाणिग्रहणयोग्यं तं मत्वा प्रैषीन्नराधिपः । प्रधानान्सर्वदेशेषु नृपकन्या निरीक्षितुम् ॥ २३ ॥ कुमारस्तु परिजने सत्यप्यादेशकारिणि । आदेशं कुरुते पित्रोः स्वयं विनयतो द्रुतम् ॥ २४ ॥

अन्यदा [1]वाहकेलिं स गतो [2]वाहानवाहयत् । जातश्रमश्च [3]कंकेल्लितरुमूलेमुपाविशत् ॥ २५ ॥ तत्र तिष्ठति भूपालसुते रेणु-

कथानकम् ।

अपराजित-जन्म, कलाचार्यादभ्यासः तद्योग्यकन्या निरीक्षितुं प्रधानप्रेषणञ्च

॥ २ ॥

१ अश्वक्रीडाम् । २ अश्वान् । ३ अशोकतरुमूले ।

भरोऽस्फुरत् । तस्मिन्ससम्भ्रमे वाद्यरवोऽभूच्च श्रवोऽतिथिः ॥ २६ ॥ परचक्रं समेतीति बहिर्वासी जनोऽखिलः । अन्तर्विशन्न माति स्म गोपुरेषु पृथुष्वपि ॥ २७ ॥ नृपोऽपि तुमुलं श्रुत्वाऽपृच्छदासन्नपूरुषान् । तेभ्यो ज्ञातारिवृत्तान्तो यात्राभेरीमवादयत् ॥ २८ ॥ ऊचे च सज्जतां सैन्यं चतुरङ्गमपि क्षणात् । आकार्यतां कुमारश्च त्वरितं वाहकेलितः ॥ २९ ॥ तं मुक्त्वात्र यथा शत्रून् जेतुं यामो वयं स्वयम् । सैन्यं सज्जमभूदागात्प्रधानश्चापराजितम् ॥ ३० ॥ स प्राहाहूयते देवः स्वयं रिपुरणोन्मुखः । ऊचे चादृष्ट-युद्धोऽसि तन्न स्थेयं युधि त्वया ॥ ३१ ॥ कुमारः प्राह तातस्यादेशः शिरसि मे सदा । तथाप्येनमविनयं तातः सहतु मत्कृतम् ॥ ३२ ॥ कथं च मयि सत्यूर्जे[1] योद्धुं तातस्य युज्यते । त्वया न दृष्टं प्राक् युद्धं तातपादा यदादिशन् ॥ ३३ ॥ तत्र विज्ञप्य-मीदृक्षं ज्ञायते दृष्टमेव किम् । अदृष्टमपि यद्ग्रन्थबलेन ज्ञायतेऽखिलम् ॥ ३४ ॥ ममात्र जैन्ययात्रायां[2] तातपादप्रसादतः । कर-ग्रहः कुमारस्य भविष्यति जयश्रियाः ॥३५॥ गत्वा विज्ञप्यतां तातो मम साहाय्यहेतवे । न प्रहेया चमूर्ध्वान्तध्वंसेऽरुणसखो ह्यलम् ॥ ३६ ॥ प्रधानेनेति विज्ञप्ते नृपस्तोषादभाषत । ज्ञायते मम पुत्रो यदीदृक् चित्तं शिशोरपि ॥ ३७ ॥ प्रधानाः प्रोचिरे युक्तं सिंहः सिंहस्य नन्दनः । रविरेव रवेर्बिम्बं कल्पद्रुश्च तदङ्कुरः ॥ ३८ ॥ नृपः प्राह कुमारेण निषिद्धापि पताकिनी[3] । प्रेष्यतां वातनुन्नो हि वह्निर्दहति काननम् ॥ ३९ ॥ चक्रव्यूहं कुमारोऽथ विनिधाय स्वचक्रगम् । सम्मुखः परचक्रस्याजनि चक्रधरप्रभः ॥ ४० ॥ तदा-नोर्द्धुषितं[4] वर्यवर्मण्यस्य वपुर्ममौ । उत्साहो द्विगुणश्चासीत्स्फुरिते दक्षिणेऽक्षिणि ॥ ४१ ॥ दृश्यते केवलं दीप्यमानमायुधमण्ड-लम् । पताकाः पवमानेन कम्पमानाश्च सर्वतः ॥ ४२ ॥

अश्वक्रीडायै बहिरुद्यान-गमनं, तत्र पित्राकरणं, युद्धाय गमनञ्च

---

१ बलवति । २ युद्धयात्रायाम् । ३ सेना । ४ रोमाञ्चितम् ।

अपरा-
जित-
॥ ३ ॥

इतश्च विजयो नाम प्रधानः प्रहितः पुरा । जयशेखरराजेन परसैन्यात्स आगमत् ॥ ४३ ॥ अपृच्छच्च [१]बलमिदं किमर्थं समनह्यत । कश्चात्र सैन्यनाथोऽस्ति प्राहैकोऽथ महापुमान् ॥ ४४ ॥ आगच्छतोऽस्य सैन्यस्यादः सैन्यं प्रगुणीकृतम् । सेनानीश्च कुमारोऽत्र तारकस्येव संयति ॥ ४५ ॥ स स्मित्वाह कुमारः क्व तं च वेत्री न्यवेदयत् । कुमाराय तदादेशाद्वेत्रिणाथ प्रवेशितः ॥ ४६ ॥ स च प्रणम्य साष्टाङ्गं निविष्टो दापितासने । कुमारस्तं स्मितमुखं वीक्ष्य चित्ते व्यचिन्तयत् ॥ ४७ ॥ मुखश्रीरस्य दुःसाधसाधितस्वामिकार्यताम् । निवेदयति नेदृक्षा मुखश्रीर्यदनेहसि ॥४८॥ ध्यात्वेत्याह कुतो यूयमागताः कः समेत्ययम् । स प्रोवाच कुमारस्य जयश्रीर्नामतः प्रिया ॥ ४९ ॥ एतस्या अत एवाहं सैन्यादस्मि समागतः । कुमारः प्राह नो हास्यवेला वद यथातथम् ॥ ५० ॥ स प्राह देवपादानां कथं विज्ञप्यतेऽन्यथा । कुमारेण कथमिति प्रोक्ते स प्राह सम्मदात् ॥ ५१ ॥ आदिष्टोऽहं पुरा देव पादैस्त्वदनुरूपकाः । कन्या निरीक्षितुं ताश्च सर्वत्रापि गवेषिताः ॥ ५२ ॥ चित्रस्थितभवद्रूपसदृशी क्वापि तासु न । नगरेऽथागममहं नामतः कुसुमाकरे ॥ ५३ ॥ क्षत्रावतंसकुसुमावतंसस्य महीपतेः । कुसुमश्रीमहादेवीकुक्षिजेयं सुताद्भुता ॥ ५४ ॥ अन्यदा च समागच्छत्सुरभिः सुरभिः सुमैः । यत्र निर्यान्ति च[२]ञ्चर्यैः समं विरहिजीवितैः ॥ ५५ ॥ जनेन रागिणा सार्धं बद्धस्पर्धैरिवाधिकम् । किंशुकैरपि पुष्पेषु रागो नीतः प्रकाशताम् ॥ ५६ ॥ दोलन्ति यत्र दोलाश्च चित्तानि च वियोगिनाम् । तपन्ति यत्र पान्थस्त्रीमनांसि रविणा सह ॥ ५७ ॥ विलासैः श्रीमतां सार्धं वर्द्धन्ते यत्र वासराः । जाता विरहिणीदुःखं निरीक्ष्यैव निशाः कृशाः ॥ ५८ ॥

कथान-
कम् ।

जयशेखरप्रेषितविजयस्य प्रत्यागमनम्, कुमारेण मिलनं, वार्तालापश्च

॥ ३ ॥

---

१ युद्धे । २ अमर्यः ।

ततः पौरजनो गौरमुखः सर्वः स्मरोत्सवे । अचलत्[1]काञ्चनाकल्पकल्पनास्थिरितेक्षणः ॥ ५९ ॥ सा कुमार्यप्य[2]नाहार्यरूपा भूपालनन्दना । यान्ती मदनपूजार्थं निरैक्ष्यत तदा मया ॥ ६० ॥ चिन्तितं च दलैश्चक्रे यैः कुमारोऽपराजितः । तैरेव विधिना मन्ये सेयं सुसदृशी ततः ॥ ६१ ॥ संयोगो विक्रमेणेव कुमारेण समं ततः । अस्या जयश्रियः कर्तुमुचितः प्रतिभाति मे ॥ ६२ ॥ ध्यात्वेत्यह्नि द्वितीयस्मिन् युष्मदुद्वाहहेतवे । राज्ञः कन्या मयायाचि स प्राहेति सुसुन्दरम् ॥ ६३ ॥ परं पुराप्यसौ कन्या याचिता बहुभिर्नृपैः । दर्शयित्वा कुमाराणां प्रतिरूपाणि मेऽग्रतः ॥ ६४ ॥ एकस्यापि परं रूपमस्या न प्रतिभासितम् । तत्त्वं रूपं कुमारस्य दर्शयाऽऽनीतमस्ति चेत् ॥ ६५ ॥ मयाथ प्राक् सहानीतं चित्रस्थं चित्रकारि ते । चिद्रूप! दर्शितं रूपमाप भूपस्ततो मुदम् ॥ ६६ ॥ प्रैषीत्कन्यान्तिके तस्याः पश्यन्त्यास्तच्च तत्क्षणात् । समं रूपमरूपस्य शराश्च प्राविशन् हृदि ॥ ६७ ॥ य एव रत्नवलया दृढाः प्राग् दर्शनेऽभवन् । त्वत्सङ्गचिन्तादौर्बल्यात्त एत्र श्लथतामगुः ॥ ६८ ॥ क्षणं परिचितेनापि त्वद्रूपेण वशीकृता । सा दर्शनरसादौज्झन्निद्रां चिरसखीमपि ॥ ६९ ॥ अहोरात्रं तयालोक्य निजः प्रोचे सखीजनः । कल्ये रतिपतेः पूजाफलमेतन्मयाप्यत ॥ ७० ॥ अम्बामुखेन विज्ञप्तस्तातः शङ्कति मे हृदि । प्रतिबिम्बसमं बिम्बमस्ति वा नास्ति वाद्भुतम् ॥ ७१ ॥ तातादेशेन तदहं स्वयं गत्वावलोकये । प्रेषिता च नृपेणैषा प्रधानपुरुषैः सह ॥ ७२ ॥ प्रहितं चतुरङ्गं च सैन्यमेतत्तया सह । पथस्थान्यनृपव्यूहप्रत्यूहव्यूहनाशनम् ॥ ७३ ॥ यद्यस्यास्तत्र यातायाः[3] कुमारः प्रतिभासते । कारणीयं ततः पाणिग्रहणं कृतविस्तरम् ॥ ७४ ॥ लब्धादेशाः प्रधानास्ते तत एव समागताः । सम्मर्देन यैता सत्यं सा जयश्रीः समागता ॥ ७५ ॥ विसर्जयत तद्यूयमाडम्बरम्-

जयश्रीप्राप्तिनिवेदनं, सैन्यविसर्जनञ्च

---

१ स्वर्णाभूषणम् । २ अकृत्रिमरूपा । ३ गच्छता ।

परस्परं दर्शनेन उभयोः प्रेम, परिणयनोत्सवः, वेदिकायाः कुमारस्यापहारश्च

शेषकम् । नैव यावदिहाद्यापि कन्यासैन्यं समेति तत् ॥ ७६ ॥ विसृज्य बलसन्नाहं कुमारः स्थानमागमत् । जनं संस्थापयामास बाह्यं चारक्ष्यपूरुषैः ॥ ७७ ॥

नृपः कन्यागमोदन्ते विजयेन निवेदिते । तं देशनायकं चक्रे प्रसादविशदाननः ॥ ७८ ॥ कन्यासैन्यस्य चावासस्थानकानि न्यधापयत् । प्रधानान्सम्मुखान्प्रेष्य सर्वमातिथ्यमातनोत् ॥ ७९ ॥ अन्यदा च तदावाससमीपेनापराजितः । इभारूढो व्रजन् रङ्गत्तुरङ्गमचमूवृतः ॥ ८० ॥ शुभन् शुभ्रातपत्रेण वीज्यमानश्च चामरैः । अखण्डचण्डदोर्दण्डमण्डलाधिपमण्डितः ॥ ८१ ॥ विराजमानो नेपथ्यच्छाययातीवतीव्रया । तस्या दृष्टिसुधावृष्टिरजायत कुमारतः ॥ ८२ ॥ ( त्रिभिर्विशेषकम् ) अचिन्तयच्च सा सैष नवः कोऽपि मनोभवः । एकेन गुणकाण्डेन जगज्जयति योऽखिलम् ॥ ८३ ॥ विश्वमान्या सरस्याज्ञा कुमारेणापि मानिता । दध्यौ च भूतले स्वर्गवर्णिनीवर्णिकासकौ ॥ ८४ ॥ कन्यया स्वप्रधानानां पुरतोऽथ निवेदितम् । चित्रकृद्रूपतश्चित्रकृद्रूपं भूपजन्मनः ॥ ८५ ॥ प्रधानैः सुमुहूर्तेऽथ विज्ञप्तो जयशेखरः । देवापराजितस्येयं जयश्रीरुचिता प्रिया ॥ ८६ ॥ तदीयवचनं सद्यः प्रतिपद्य प्रमोदवत् । गणकैर्गणयामास सुलग्नं जगतीपतिः ॥ ८७ ॥ त्यक्तान्यकृत्यो भूपस्यादेशात्तस्याः परिच्छदः । एकाग्रचित्तः समभूत्पाणिग्रहणकर्मसु ॥ ८८ ॥ नृपस्य परिवारस्य कुमारस्य जयश्रियः । वासरास्ते प्रयान्ति स्म प्रमोदभरभासुराः ॥ ८९ ॥ वासरेऽथ विवाहस्य तूर्यनादे प्रसर्पति । दीयमानेषु दानेषु क्रियमाणे च मङ्गले ॥ ९० ॥ निःप्रत्यूहो विवाहो यद्यनयोः स्यात्ततोवरम् । दृग्दोषो भविता तथ्यं जल्पत्येवं जनो मिथः ॥ ९१ ॥ विवाहवेदिकामध्ये स्थितेऽपि च वधूवरे । वाताहतो दीप इव कुमारोऽदृश्यतामगात् ॥ ९२ ॥

॥ ४ ॥

अथ विस्मयशोकानामभवद्भाजनं जनः । चक्रन्द राजपुत्री तु दैवोपालम्भगर्भितम् ॥ ९३ ॥ विप्रयोगं ददानेन कुमारेण समं मम । कृतान्त! किं त्वया प्रापि पीयूषे क्षिपता विषम् ॥९४॥ 'वैधेयोऽसि विधे! सृष्ट्वा नृरत्नं तादृशं हरन् । निर्दयो वज्रहृद्दुष्टचरितश्च त्वमेव हि ॥ ९५ ॥ हा प्राणनाथ! कल्पद्रोस्तव दूरेऽस्तु मे फलम् । न पाणिपल्लवोप्यापि मयका मन्दभाग्यया ॥ ९६ ॥ किं च प्रिय! ममाख्याहि सुन्यस्तोऽपि मया हृदि । तस्मिन्नस्फुटिते नाथ! सहसा निर्गतः कथम् ॥ ९७ ॥ विलपन्तीति सा बाढं मूर्च्छिता भूतलेऽपतत् । उपचारैश्च बहुभिः पुनर्जज्ञे स चेतना ॥ ९८ ॥ उवाच विरहे पत्युर्ज्वलनः शरणं मम । यदुत्तमकुलस्त्रीणामिदमेवोचितं भवेत् ॥ ९९ ॥ नृपो जगाद मा खेदं कुरु वत्से! यतस्तव । न पाणिग्रहणं तेन योग्यतास्त्यपरे वरे ॥ १०० ॥ सा प्राह तातपादानां वक्तुं नैतद्धि सङ्गतम् । व्यवहारो ह्ययं भर्ता स तु यो मानितो हृदि ॥ १०१ ॥ तन्मे स एव शरणमथवासौ हुताशनः । अलं कालविलम्बेन यद्दूरे याति वः सुतः ॥ १०२ ॥ कथं निवर्तनीयेयमित्यार्त्तमनसोस्तदा । नृपदेव्योर्विसस्मार दुःखं सुतवियोगजम् ॥ १०३ ॥ नृपो जयश्रियं प्राह वत्से! मम निदेशतः । मासमेकं प्रतीक्षस्व यथा शुद्धिं विधापये ॥१०४॥ दुर्ग्रहाभिग्रहा तस्थौ सापि देव्यपि दुःखतः । नृपस्त्वकारयत् शुद्धिं सर्वत्र प्रेष्य सादिनः ॥ १०५ ॥ आघोषणा नरेन्द्रेण पुरीमध्येऽपि कारिता । कुमारशुद्ध्याख्यात्रे स्वराज्यस्यार्धं ददाम्यहम् ॥ १०६ ॥ प्रधानगमनाज्ज्ञातोदन्तः कन्यापितापि हि । सर्वत्राशोधयत्प्रेष्य सादिनोऽनवसादिनः ॥ १०७ ॥ तत्पित्रोरुभयत्रापि त्यक्तराज्याङ्गकार्ययोः । कल्पकल्पा दिना यान्ति दुःखसाम्राज्यशालिनोः ॥१०८॥ त्रिंशत्तमे दिने कन्या प्राह पूर्णोऽधुनावधिः । तदादिशत येनाहं करोमि स्वसमीहितम् ॥१०९॥

कुमारापहारेण सर्वेषां शोकः तस्य शुद्ध्यर्थं प्रयासः, तस्याप्राप्तौ जयश्रियाः चिताप्रवेशादेशयाच्ञा

१ मूर्खः ।

नदीतीरे चन्द- नैश्चिताकरणं, वामनेत्र- स्फुरणञ्च

प्रतीक्षस्व चतुर्यामीमित्युक्त्वा सा स्थिरीकृता । सम्बोधयितुमारब्धा न चाबुध्यत्कथञ्चन ॥ ११० ॥ तस्यां कृतोपवासायामखिलोऽपि पुरीजनः । चित्रलिखितवज्जज्ञे सर्वकार्यविवर्जितः ॥ १११ ॥ साथ सायं वशारूढा वार्यमाणापि भूभुजा । सुवर्णवृष्टिं कुर्वाणा पूर्णचन्द्रमुखप्रभा ॥११२॥ स्वसैन्यकृतमाक्रन्दं समकालं च शृण्वती । जङ्गमं तीर्थमेषेति श्लाघ्यमाना सखीजनैः ॥११३॥ सङ्गमो दयितेनास्या अस्मच्छीलेन जायताम् । इत्थमाशास्यमानोच्चैर्वृद्धस्त्रीभिः पदे पदे ॥ ११४ ॥ पौरलोककृतान्देवोपालम्भानपि शृण्वती । राज्ञानुगम्यमाना सा निर्गता नगराद्बहिः ॥ ११५ ॥ ( चतुर्भिः कलापकम् )

तया गत्वा नदीतीर्थे चिता चन्दनदारुभिः । कारिता ज्वलनज्वालामालाभिरतिदारुणा ॥ ११६ ॥ चन्दनागरुदारूत्थवह्निचिह्नप्रसर्पणात् । वास्यन्ते स्म दिशस्तस्या यशसेव समन्ततः ॥ ११७॥ कुमार्यथ स्फुरद्वामचक्षुश्चित्ते व्यचिन्तयत् । अभूद् ध्रुवं समासन्नः प्रस्तावः प्रियसङ्गमे ॥ ११८ ॥ तदा च तरणिस्तादृगसमञ्जसमीक्षितुम् । अक्षमोऽस्ताद्रिगो वार्द्धौ झम्पां दातुं प्रचक्रमे ॥ ११९ ॥ चिताहुताशनज्वालामालाभीता इवाभितः । अनुसस्रुः शिखरिणां शिखराणि विहङ्गमाः ॥ १२० ॥ दृष्ट्वा जनस्य दुःखौघं दुःखिताया नभःश्रियः । सन्ध्यारागमिषान्मन्ये हृदयं सहसाऽस्फुटत् ॥ १२१ ॥ वधूर्गजवधूपृष्ठोत्तीर्णा श्वशुरयोः पदौ । नत्वा व्यजिज्ञपन्मौलिसम्मीलितकरद्वया ॥ १२२ ॥ मया श्रीपूज्यपादानां यत्किञ्चिद्विप्रियं कृतम् । कुलरूपधनमदैः प्रमादादथ चापलात् ॥ १२३ ॥ लोभकैतवबाल्यैश्च तत्क्षम्यं सर्वमेव मे । पूज्यपादाब्जभृङ्गीत्वभाग्यं नाभूच्चिरं मम ॥ १२४ ॥ निर्गुणाप्यपगुण्यापि भवान्तरगतापि हि । निजनन्दनभार्येति स्मार्याहं पूजितक्रमैः ॥ १२५ ॥ श्रुत्वेति वचनं तस्याः करुणं विनयान्वितम् । धैर्यवृत्तिं विमुच्योच्चैः पूच्चकार धराधवः ॥ १२६ ॥ अथैकहेलया सर्वजनाक्रन्दे समुत्थिते । वनदेव्योपि चक्रन्दुः प्रतिशब्दपदेशतः

॥ १२७ ॥ उवाह वाहिनी नेत्राम्बुभिस्तत्र चमूकृतैः । अतिधीरैरपि तदा कैः कैर्न रुदितं नरैः ॥ १२८ ॥ सा प्राह वर्ह्हे भगवन्!
साहसस्यास्य चेत्फलम् । अस्ति तत्परलोकेऽपि भूयाद्भर्तापराजितः ॥ १२९ ॥ इत्युक्त्वा त्रिःप्रदक्षिण्य वह्निं यावत्तदन्तरे । झम्पां
ददाति सा तावत्कश्चित्तत्रागमन्नरः ॥ १३० ॥ स च खड्गकरः प्राह साहसेनामुना कृतम् । पित्रोराज्ञास्ति ते झम्पां यदि दत्से

यावज्झम्पां ददाति ताव-दपराजिता-गमनम्

हुताशने ॥ १३१ ॥ धूमेन वदनं तस्याः सोऽपश्यन्नाह का शुभे! । त्वं कस्य हेतवे चैवं साहसं च व्यवस्यसि ॥ १३२ ॥ कुश-
ल्यस्ति समं देव्या देवः श्रीजयशेखरः । या चागता कुमार्यासीदिह साभूत्कथं शुभा ॥ १३३ ॥ पित्राज्ञायन्त्रिता साथ विरम्या-
नलपाततः । तस्याननमपश्यन्ती प्रकाशं द्वेषभावतः ॥ १३४ ॥ मदीयप्रस्तुतार्थस्य कोऽयं विघ्नकृदागमत् । हृदये चिन्तयन्तीति
तस्याख्यातुं प्रचक्रमे ॥ १३५ ॥ या पृष्टा भवता साहं कुमारार्थे करोम्यदः । तं नृरत्नं विना तातः कुशली सपरिच्छदः ॥१३६॥
वदन्त्येति तया मुक्ते महति क्रन्दितस्वरे । हर्षखेदयुतो दध्यौ कुमारो निजमानसे ॥ १३७ ॥ कृते मे क्षणदृष्टस्य सुमकोमलया-
नया । सहसा सर्वमुज्झित्वात्मा तुलाग्रे[1] नियोजितः ॥ १३८ ॥ तत्किञ्चिद्दुष्करस्यास्याः सुकृतस्य करोम्यहम् । तदस्या न भविष्यामि
कदाचन पराङ्मुखः ॥ १३९ ॥ इयं चम्पकमालेव लब्धा देवप्रसादतः । अम्लाना प्रेमसौरभ्या सदा वसतु मे हृदि ॥ १४० ॥
ध्यात्वेति तामुवाचायं यस्यार्थे मृगलोचने! । करोष्येवं न तं दृष्टमुपलक्षयसेऽपि हि ॥ १४१ ॥ श्रुत्वेत्यस्या विस्मितायाः स्फूर्त्या-
भूत्सधरोऽधरः । दध्यौ किमेष वक्तीदं किं च स्फुरति मेऽधरः ॥ १४२ ॥ तदा दर्शयितुमिव कुमारमुखकैरवम् । नेत्रनीलोत्पलस्या-
स्याद्रष्टुं विस्मेरतामिव ॥१४३॥ तापितानि तदङ्गानि सिञ्चन्निव सुधारसैः । सुधारुचिरुदीयाय तस्याः सह मुखश्रिया ॥१४४॥ (युग्मम्)

---

१ दिव्यपरीक्षाया अग्रे ।

कुमारमुखचन्द्रं च निस्तन्द्रं चन्द्ररोचिषा । वीक्ष्य कण्ठे विलग्यापि मुक्तकण्ठं रुरोद सा ॥ १४५ ॥ आश्वासिता च तेनेयं तैस्तैर्म-
धूरभाषितैः । समग्रं गलितुं लग्नं दुःखं स्वेदाम्भसा समम् ॥ १४६ ॥ रसौ विजृम्भितौ तुल्यमेव प्रेमप्रमोदयोः । अङ्गतापमनस्तापा-
वतीतौ सममेव तत् ॥ १४७ ॥ अङ्गानि च प्रफुल्लानि नयनेन्दीवरैः[1] सह । अस्फुरच्च शरीरे श्रीः पुलकेन[2] सह क्षणात् ॥ १४८ ॥
अथ तस्या दृढाश्लेषवामनीभूतवक्षसः । यत्किञ्चन सुखं जातं तत्स्वर्गेऽपि सुदुर्लभम् ॥ १४९ ॥ साक्षीकृत्य तमेवाग्निं ताभ्यां
चित्तोत्सवात्ततः । गान्धर्वेण विवाहेन विदधे पाणिपीडनम् ॥ १५० ॥ तथा कथञ्चन तयोर्मीलितौ पाणिपल्लवौ । अवियुक्तौ यथा-
कामकलम्बैः[3] किलिताविव ॥ १५१ ॥ साथ प्राह प्रियतम! पौरलोकेन संयुतौ । मदीयेन च सैन्येन बह्वाक्रन्दपरिश्रमात् ॥ १५२ ॥
त्वदीयेन वियोगेन समानेन च कर्मणा । स्वस्तटिन्यास्तटे बाढं देवो देवी च दुःखितौ ॥ १५३ ॥ कस्याप्यत्र तु नागन्तुमदायि
शपपूर्वकम्[4] । निर्विघ्नं प्रस्तुतं कार्यं मयाभिलषमाणया ॥ १५४ ॥ तद्वः समुचितं कर्तुं मुदं पित्रोः स्वदर्शनात् । कुमारोऽथ पुर-
स्कृत्य तामगात्तत्र वित्तमः[5] ॥ १५५ ॥ आगच्छन्तौ च तौ वीक्ष्य जनोऽश्लाघत तत्प्रियाम् । तथाकर्णयतस्तस्य प्रेम द्विगुणतां
गतम् ॥ १५६ ॥ कुमारमागतं वीक्ष्य प्रतीहारस्तयान्वितम् । राज्ञे व्यज्ञपयत्सोऽपि शीघ्रमेत्य ननाम तम् ॥ १५७ ॥ निरन्तरा-
श्रुधाराभिरारात् पितृपदद्वयम् । असिक्त स तथा तापो यथा मूलाद्व्यलीयत ॥ १५८ ॥ नृपोऽपि तनयं प्रेक्ष्य जातानन्दाश्रुबि-
न्दुभिः । प्रह्वीचक्रे कुमाराय दातुं मुक्तालतामिव ॥ १५९ ॥ देवीमप्यागतां तत्रोत्कण्ठया प्रणनाम सः । तत्पादाम्बुजयोर्वेणी-
मलिश्रेणीमिवादधत् ॥ १६० ॥ प्रमोदेनात्रुटन्मातुः सर्वाः कञ्चुकसन्धयः । ऊचे च नन्दनं पुण्यैर्युवां मे कोटिवत्सरीम्

१ नेत्रकमलैः । २ हर्षेण । ३ कामबाणैः । ४ शपथपूर्वकम् । ५ पण्डितप्रवरः ।



तत्रैव गान्धर्वेण विवाहः पित्रोः मिलनञ्च

॥ १६१ ॥ जनं शेषमशेषं च कुमारो वीक्ष्य सादरम्। आसन्नो न्यषदद्राज्ञो नम्रशीर्षः कृताञ्जलिः ॥ १६२ ॥ पित्रोः प्रियाया लोकानां स्मेरैर्नयनवारिजैः। कुमारस्याश्वितािङ्गस्य शोभा काप्यद्भुताभवत् ॥ १६३ ॥ आनखाग्रं शिखाग्रं च कुमारं वीक्ष्य भूपतिः। उवाच स्वागतं वत्स! स प्रोचे दर्शनेन वः ॥ १६४ ॥ पश्यतां क्व गतोऽसि त्वं कुतश्चागात्तवाद्भुतम्। चरितं भाति मे सोऽथ प्रोवाच रचिताञ्जलिः ॥ १६५ ॥

देवस्यैव प्रसादोऽयं पश्य निम्बोऽपि पूज्यते। जनैर्यत्तस्य सा सम्भावना दिनकृता कृता ॥ १६६ ॥ देवावधार्यतां वीतं सर्वं विज्ञपये यथा। क्वापि केनापि नीतोऽहमिति जानामि नादितः ॥ १६७ ॥ प्रातस्त्वाराममध्यस्थप्रासादे सप्तभूमिके। विबुद्धोऽद्राक्षमात्मानं दोलापल्यङ्कशायिनम् ॥ १६८ ॥ निविश्याहं ततो दध्यौ क्व पुरं मे पिता क्व च। क्वाम्बा च क्व च सा कन्या क्व मे परिजनोऽखिलः ॥ १६९ ॥ स्वप्नोऽयमिन्द्रजालं वा किं वा मेऽसौ मतिभ्रमः। स्वर्गोऽयं नागलोको वा यावद्ध्यायाम्यदो हृदि ॥ १७० ॥ तावद् द्वास्तोरणस्तम्भशीर्षाभ्यां बालिके उभे। अवतीर्णे रत्नमये मम विस्मयदायिके ॥ १७१ ॥ सुगन्धसरसस्वच्छवारिमाणिक्यकुम्भभृत्। तयोरेकाऽपरा पाणौ दर्पणं दधती पुनः ॥ १७२ ॥ ते वीक्ष्य स्वर्वधूतुल्ये विस्मितो यावदस्म्यहम्। तावदाद्या समागत्य प्राह प्रक्षाल्यतां मुखम् ॥ १७३ ॥ तथा कृते मयादर्शमपरा मे समर्पयत्। यावद्वीक्ष्ये मुखं तावत् श्रुतो जयजयध्वनिः ॥ १७४ ॥ पृष्टा कलसहस्ताथ कुत एष जयध्वनिः। सोचे पोतनभूनेतृजयसिंहस्य नन्दना ॥ १७५ ॥ जयसुन्दरीनामासौ कन्या नित्यं समेति च। प्रासादस्थां सत्यगिरं देवीं नन्तुं प्रियङ्करीम् ॥१७६॥ (युग्मम्) असौ वरार्थिनी सन्ध्यात्रयेऽपि

अपराजितेन स्वापनयनवृत्तान्तकथनम्

१ प्रशंसिताङ्गस्य।

अपराजितस्य जयसुन्दर्या सह वार्तालापः

कुरुतेतराम् । वीणाया वादनमिति षण्मासा व्यतिचक्रमुः ॥ १७७ ॥ तद्भक्तितुष्टया देव्याऽऽवयोरादिष्टमित्यथ । सन्ध्याया समये यात जयन्त्यां [1]जवतो युवाम् ॥ १७८ ॥ विवाहवेदिकामध्यादजाते पाणिपीडने । इह चानयतं वेगात्कुमारमपराजितम् ॥ १७९ ॥ यतो नृपाग्रतो [2]दैवज्ञेनास्तीदं निवेदितम् । यः पल्यङ्कमलङ्कर्त्ता युष्मदुद्यानसौधगम् ॥ १८० ॥ निबद्धकङ्कणो यश्च विनयं पुत्रिकाकृतम् । प्रपन्नो प्रथमा तस्य गृहिणीयं भविष्यति ॥१८१॥ (युग्मम्) तदावाभ्यां हृतोऽसि त्वं शक्त्या सुन्दर ! दिव्यया । श्रुते तत्कथिते यावदर्पयामि न दर्पणम् ॥ १८२ ॥ तावत्तत्रैव सम्प्राप्ता सहसा जयसुन्दरी । पाञ्चालीचरितं वीक्ष्य स्मेराक्षी सा व्यचिन्तयत् ॥ १८३ ॥ तन्नास्ति यद्भवे न स्यादिति सत्यवचोऽभवत् । विनयं कुर्वते क्वापि पुत्रिकाः किमचेतनाः ? ॥ १८४ ॥ देव एवायमीदृक्षं रूपं मर्त्त्येषु नो यतः । ध्यायन्ती व्युदिता ताभ्यां मा सुन्दरि ! विकल्पय ॥ १८५ ॥ वरोऽयं तुष्टया देव्याऽऽनायितस्तव हेतवे । अपराजितनामायं साथ ह्रीमन्थराभवत् ॥ १८६ ॥ दिष्टिज्ञादिष्टमस्मार्षीन्मयाथ निजमाननम् । निरीक्ष्यार्पित आदर्शे पुत्रिके स्थानकं गते ॥१८७॥ ततश्च जयसुन्दर्या सकर्पूरं ममार्पितम् । ताम्बूलं कण्ठतो न्यस्ता कण्ठे मे [3]वनमालिका ॥ १८८ ॥ ताम्बूलार्द्धं मया दत्त्वा तस्याः कण्ठे स्वकण्ठतः । न्यस्ता मुक्तावली सोचे वेषः परिणयोचितः ॥ १८९ ॥ किमेष वो मया ख्याते वृत्तान्ते दिव्यवाससी । आनाय्य सार्पयन्मह्यं मया परिहिते च ते ॥ १९० ॥ तयोचे च सविनयं जनोऽयं निखिलोऽपि वः । ततः कार्यं यत्किमपि तदादेश्यमसंशयम् ॥ १९१ ॥ यौष्माकं दर्शनं प्रापि दुष्प्राप्यं यत्प्रसादतः । तां देवीमर्चये गत्वा यद्यादेशः प्रजायते ॥ १९२ ॥ स्मित्वा मयोचे सा पूज्या ममापि तव दर्शनात् । सा प्राह यूयं यद्येत कृतार्था तद्भवाम्यहम् ॥ १९३ ॥ ततः पुरस्सरस्तस्याश्चलितः सापि पृष्ठतः । कतिचिच्चेटिकायुक्ताश्चेभाद्यं तु बहिःस्थितम् ॥ १९४ ॥ मया

---

१ वेगतः । २ ज्योतिर्वित् । ३ आजानुलम्बिनी माला सर्वर्तुकुसुमोज्ज्वला । मध्ये स्थूलकदम्बाढ्या वनमालेति कीर्तिता ।

तयोर्द्वयोः परिणयनं अपराजितस्य पित्रोर्मिलनं, पित्रा जयसुन्दर्यानयनाय प्रधानप्रेषणञ्च

तथा च गत्वाथ बहुद्रव्यैः सुगन्धिभिः । हसन्तीव वदन्तीवार्चिता देवी प्रियङ्करा ॥ १९५ ॥ विज्ञप्ता च मया देवि ! त्वया कार्यं प्रियङ्करि ! । कुशलं तातपादानां मातुः पुत्र्याश्च भूपतेः ॥ १९६ ॥ तयाथ वादिता वीणा यन्माधुर्याद्विधुर्दिवा । नोदेति चिन्तयन्नेवं मा मे यातु मृगोऽङ्कतः ॥ १९७ ॥ ततस्तया सहैवाहमागमं तत्र मन्दिरे । किञ्चिन्मुक्त्वा परिजनं सा निजावासमासदत् ॥१९८॥ साऽऽख्यद्वृत्तान्तमम्बायाः सा राज्ञे सोऽथ विस्मितः । प्रैषीद्भोगोपभोगाङ्गान्यखिलानि कृते मम ॥ १९९ ॥ गणकैर्गणिते लग्ने सामग्री विदधेऽखिला । व्याहृताः स्वजना भूपाः प्रधानान्प्रेष्य सर्वतः ॥ २०० ॥ सुमुहूर्तेऽथ मिलिते राजके निजकेऽखिले । सर्वानन्दमयं जज्ञे पाणिग्रहणमद्भुतम् ॥ २०१ ॥ राज्ञाष्टादशकोट्यो मेऽष्टापदस्य[1] शतं गजाः । दशलक्षास्तुरङ्गाणां दत्ताश्च करमोचने ॥२०२॥ सर्वत्र स्वनरान्मुक्त्वाऽनाख्याय निशि निर्गतः । त्वया खेदो न धार्योऽहमेष्यामि कतिथैर्दिनैः[2] ॥२०३॥ भित्तौ वर्णा लिखित्वेति कस्तूर्या करवालभृत् । अद्यैव चलितः प्राप्तः समिलायुगयोगवत् ॥ २०४ ॥ यद्यद्य तात नायामि तज्जीवन्ती स्नुषा न वः । नियमेन भवेत्तेन राधावेध इवाभवत् ॥ २०५ ॥

अथ वत्साभिजातोऽसि वदता मेदिनीभुजा । रोमाञ्चितशरीरेणाश्लेषे गाढं स्वनन्दनः ॥ २०६ ॥ सन्तोषजागरं कृत्वा निशि भानूदये ततः । आरोह्य सिन्धुर[3]स्कन्धे धरणीशो वधूवरम् ॥ २०७ ॥ अकारयत्पुरस्यान्तःप्रवेशकमहोत्सवम् । वर्धापनानि जातानि परितोऽपि पुरान्तरा ॥ २०८ ॥ आनेतुं प्रहिता राज्ञा प्रधाना जयसुन्दरीम् । मुद्रां कुमारनामाङ्कां समर्प्य प्राभृतानि च ॥ २०९ ॥ ते द्वाःस्थावेदिता नत्वा राज्ञः प्राभृतमार्पयन् । असमानं च सन्मानं तेनापि विदधे मुदा ॥२१०॥ प्रधानैर्जयसुन्दर्या

---

१ सुवर्णस्य । २ कतिपयैः । ३ हस्तिनः स्कन्धे ।

मुद्रारत्नं समर्पितम् । सा न्यास्थदङ्गुलौ विप्रलम्भ[1]तापापहारि तत् ॥ २११ ॥ तदा कथमनाख्याय कुमारोऽगादिति स्वयम् । राज्ञा पृष्टे निजगदुर्वृत्तान्तमखिलं च ते ॥ २१२ ॥ नृपः प्रोवाच नो भित्तौ वर्णाः स्युर्लिखिता यदि । तदस्या अपि सन्देहोऽभविष्यत् जीवितं प्रति ॥२१३॥ स्वर्णकोटिं ततस्तेभ्यः प्रसादेन ददौ नृपः । तुष्टया च कुमार्या ते निन्यिरे निजमन्दिरे ॥२१४॥ पुनः पुनर्वियोगाग्नितापनिर्वापणौषधम् । अपृच्छत्सा कुमारस्योदन्तं श्रुतिसुधारसम् ॥२१५॥ साथ स्वतातानुज्ञाताश्वेभाद्यादाय तैर्युता । क्रमाद्गता पतिपुरं जयन्ती रूपतः सुरीः ॥ २१६ ॥ रतिप्रीतिसदृक्षाभ्यां ताभ्यां युक्तोऽपराजितः । कुमारोऽभिमुखं तस्थौ रूपेण विषमायुधः ॥२१७॥ अन्यदा प्रबलो दाहज्वरो देव्या अजायत । त्यक्तान्यकृत्यो भूपालस्तच्चिकित्सामकारयत् ॥२१८॥ न कोप्यस्य प्रतीकारं चक्रे देशान्तरा भिषक् । उवाच बहिरुद्यानेऽधिष्ठिते दृग्विषाहिना ॥२१९॥ अस्ति वापी तदुद्भूतैरम्भोजैः स्रस्तरे[2] कृते । दाहोपशमिता भूपस्ततश्चिन्तातुरोऽभवत् ॥ २२० ॥ ( युग्मम् ) कस्तत्र प्रविशेज्जीवन्निर्गच्छेत्कस्ततो वनात् । न च स्वेन परेणापि कार्यमेतत्प्रसाध्यते ॥ २२१ ॥ तदाऽऽयातः कुमारस्तं नतः श्याममुखच्छविम् । वीक्ष्यापृच्छन्नृपोऽप्याख्यदथोवाचापराजितः ॥ २२२ ॥ चेन्नानयामि पद्मानि तन्नाहं तनयोपि वः । नृपः प्रोवाच दुःखाग्निं मा ज्वालय वदन्निति ॥ २२३ ॥ राज्यश्रीयमनाथां मा कुरु वत्स ! सुतोऽवदत् । जीवन्तं तात ! मन्ये स्वं मातुरातुरताहृतेः ॥ २२४ ॥ प्राणा भवे भवेऽपि स्युर्न तात ! समयस्त्वयम् । ततो यद्दुर्लभं तत्र यत्नः कार्यो मनीषिणा ॥ २२५ ॥ प्राणानम्बा ददौ मह्यं तस्यैतांश्चेद्ददाम्यहम् । ततः किञ्चित्कृतं मे स्यादथ दध्यौ धराधिपः ॥२२६॥ निर्बन्धो रुचिरो नास्य ध्यात्वेति स्वाङ्गरक्षकान् । शतानि पञ्चशोऽमुञ्चदमुञ्च परिरक्षितुम् ॥ २२७ ॥

कथान-
कम् ।

मातुर्दाहो ज्वरोद्भवश्च, कृतेऽप्युपाये रोगोपशमाभावाद्राज्ञ-श्चिन्ता च

---

[1] विप्रलम्भो–वियोगः तस्य तापापहारि । [2] शयने ।

मातृरोगोपशान्तये विषसर्पाधिष्ठितकमलानयनाय कमप्यनुक्त्वैव वाप्यामवतरणम्

तेन ते भोजिताः स्निग्धं घृतपूरादिभोजनम् । अतीव तेषु निद्राणेष्वपद्वारेण निर्ययौ ॥ २२८ ॥ विद्युदुत्क्षिप्तकरणाद्वप्रमुल्लङ्घ्य
सोऽगमत् । उद्यानस्यान्तिके दध्यौ प्रतीक्षेऽर्कोदयावधि ॥ २२९ ॥ कुमारसाहसं द्रष्टुमिवोदिते दिवाकरे । स्मरन्पञ्चनमस्कार-
मुद्यानमविशच्च सः ॥ २३० ॥ तदीयपुण्यमाहात्म्यात् दृग्विषो निर्विषोऽभवत् । वनदेवीकेशपाश इव दृष्टश्च तेन सः ॥ २३१ ॥
दीर्घिकायास्ततः पद्मैर्दीर्घपृष्ठः[1] स पूजितः । उक्तं च भगवन्भूयाः प्रसन्नो मे क्षमस्व च ॥ २३२ ॥ इत्युक्त्वा यावदुद्यानान्निरगा-
त्तावता नृपः । ज्ञात्वा तं गतमुद्यानमायासीत्तस्य सम्मुखः ॥ २३३ ॥ नत्वा कुमारोऽब्जमेकमार्पयत्प्राह भूपतिः । अत्यद्भुतं चरित्रं
ते वत्स ! वाचामगोचरम् ॥ २३४ ॥ स प्राह सवितुर्दीप्त्या दूरे याति तमो मम । आख्यच्च सर्वं वृत्तान्तं नृपो हर्षादुवाह च
॥ २३५ ॥ ततो नृपार्पिताश्वाधिरूढोऽयं भूभुजा समम् । सौधमागत्य तैः पद्मैर्मातुः शय्यामसज्जयत् ॥ २३६ ॥ गते च सहसा
देहदाहे कीर्तिरकृत्रिमा । प्रससार कुमारस्याभूवन् वर्धापनान्यथ ॥ २३७ ॥ निशश्च पश्चिमे यामे सर्प्पः स्वप्ने जगाद तम् । तुष्टोऽहं
ते त्वयागम्यमुद्याने मम निर्भयम् ॥ २३८ ॥ फलपुष्पादिकं सर्वमादेयं च यथारुचि । स नित्यमानयत्येकस्ततः पुष्पफला-
दिकम् ॥ २३९ ॥ कृत्वा मालाद्वयं कण्ठे पित्रो रोपयते सदा । ब्रूते चादिश्यतां तन्मे यन्मयापि हि सिध्यते ॥ २४० ॥
तावूचतुर्यदि पुण्यमगण्यं किञ्चिदस्ति नौ । भवे भवेऽपि तद्भूयाद्भवानेवाङ्गसम्भवः ॥ २४१ ॥ त्वदीयैः सुचरित्रैर्यन्नेत्रस्थमपि
हर्षजम् । जलमङ्गानि सर्वाणि शीतलीकुरुते सुत ! ॥ २४२ ॥ दृग्विषस्तु कुमारेण कुसुमाञ्जलिमोचनात् । क्षीरस्य पायनाद्वापि
बाढमावर्जितो हृदि ॥ २४३ ॥

---

१ सर्पः ।

कथानकम् । रात्रौ देवदर्शनं तेन सह रत्नकूटाचलयानं, नाटकप्रेक्षणं, रत्नमालाप्रादानञ्च ॥ ९ ॥

तस्यैवं विनयस्थस्य बहवः शरदो ययुः । अन्यदा शिरसोऽर्त्यां स नागमन्नागमक्षमः ॥ २४४ ॥ दुग्धलुब्धस्तु नागृह्णन्नागोऽन्यदशनं न च । कोऽप्युद्याने विशेत्तत्र विनैकमपराजितम् ॥२४५॥ क्षुधितोऽहस्त्रिकं सोऽस्थात्तुर्येऽह्नि निधनं गतः । क्षेत्रपालोऽभवद्ध्यायन्नवधेर्जन्म सोऽस्मरन् ॥ २४६ ॥ मत्वा संस्कार्यमाणं स्वमङ्गं चन्दनदारुभिः । कुमारेणावधेस्तस्यानवधिप्रेमजातवत् ॥ २४७ ॥ दध्यौ च कृतवेद्येष निश्चयदात्तस्य दर्शनम् । ऊचे च मित्र ! मां वेत्सि क्षेत्रेशोऽसीति सोऽवदत् ॥ २४८ ॥ विशेषं तु त्वयाऽऽख्यातं ज्ञास्याम्यथ स आलपत् । त्वत्संसर्गादहं शुद्धभावो देवोऽभवं सखे ! ॥ २४९ ॥ त्वया संस्कार्यमाणं तदेहं वीक्ष्यातिहार्दतः । आगतोऽस्म्यत्र चेद्वक्षि स्वावासं त्वां ततो नये ॥ २५० ॥ तन्मते तमनैषीत्स रत्नकूटाचलं क्षणात् । कपाटान्स्फाटिकानुद्घाट्य च मध्ये प्रवेशितः ॥ २५१ ॥ हतध्वान्तान्मणीराशीनपश्यच्च सहस्रशः । लोट्यमानं पदावर्तं दिव्यनार्या च कूपतः ॥ २५२ ॥ क्षेत्राधिपोक्तस्तन्नीरं शर्करास्वादसोदरम् । पपौ कर्पूरपूराभगन्धं केलिं जलेऽप्यधात् ॥२५३॥ दध्यौ चामृतमेवैतत् श्रीरस्य च नृपाधिका । देवदूष्याण्यदूष्यानि दत्तान्यस्मै सुपर्वणा ॥२५४॥ गत्वोद्याने च पुष्पाण्यादाय प्रसादमागतः । रत्नानि जिनबिम्बानि पूजयामासतुर्मुदा ॥२५५॥ कुमारस्तानि बिम्बानि पूजयित्वा जनुर्निजम् । जीवितं च कृतार्थत्वकलितं मतवान्मुदा ॥ २५६ ॥ क्षेत्रेशेन जिनेशाग्रे तस्य दर्शनहेतवे । द्वात्रिंशत्पात्रसम्बद्धं नाटकं प्रकटीकृतम् ॥२५७॥ दध्यौ कुमारो नैवास्ति सीमा रम्येषु वस्तुषु । वीते च नाटके प्राह कुमारं क्षेत्रनायकः ॥ २५८ ॥ रत्नमालां गृहाणेमामन्यत्कार्यं च ते भवेत् । यत्किञ्चित्तदहं वीक्ष्यस्तत्रोद्याने निशाक्षणे ॥ २५९ ॥ आदाय रत्नमालां स पुनर्दर्शनमर्थयन् । नीतश्च सौधपल्यङ्कं तेन हुङ्कारमात्रतः ॥ २६० ॥ दध्यौ च रत्नमालेयं पित्रोः कस्यार्पणोचिता । मातुर्दुष्प्रतिकारत्वान्निश्चिक्ये च तदर्पणम् ॥ २६१ ॥ न्यस्यन् कण्ठे स्रजं प्रातः पृष्ट

एष महीभुजा । दिव्यान्येतानि वस्त्राणि दिव्यः परिमलश्च ते ॥ २६२ ॥ रत्नावल्यां तथैकैकं रत्नं राज्यार्थमर्हति । रात्रिवृत्ते तदाख्याते सजनो विस्मितो नृपः ॥ २६३ ॥ उवाच भवता वत्स ! देवा अपि वशीकृताः । कृतार्थोऽस्मि त्वया दीर्घं जीवितं प्रार्थये तु ते ॥ २६४ ॥ तातस्येति गिरा धन्यंमन्योऽजनि नरेन्द्रजः । कृत्यमेतद्धि पुत्राणां रञ्जनं जनिकारिणोः ॥ २६५ ॥ रत्नमालां भक्तिमिव मातुः कण्ठे न्यधत्त सः । पृष्टो राज्ञाऽवदत्तस्या गाढं दुष्प्रतिकारताम् ॥ २६६ ॥ नृपः प्राह त्वदन्यः को जानात्येवं सुनन्दन ! । दध्यौ सुतो रत्नमालां दास्ये तातस्य चापराम् ॥ २६७ ॥

गतो निश्यन्यदोद्याने निशीथे सुरमैक्षत । तेनोचेऽहं स्मृतः कस्मात्स प्राहोत्कण्ठितोऽधिकम् ॥ २६८ ॥ स्मित्वाह क्षेत्रपालस्तं ज्ञातं रत्नावलीकृते । कण्ठादुत्तार्य सौवात् स ददेऽन्यश्च समाददे ॥ २६९ ॥ क्षेत्रेशः प्राह मेऽर्थस्ते निजः कथ्यं ततो मम । कुमारः प्राह कल्पद्रोः किं किं सम्पद्यते न वा ॥२७०॥ तमापृच्छ्याागते देवे स दध्यौ पुण्यतोऽखिलम् । सम्पद्यते ततस्तस्यार्जने कार्यः सतोद्यमः ॥२७१॥ ध्यायन्निति समागत्य पितुः कण्ठे न्यधादिमाम् । पृष्टो वृत्तान्तमाख्यच्च दध्यावथ मुदा नृपः ॥२७२॥ सुतः कीदृक् कृतज्ञोऽयं यदाद्या मातुरर्पिता । रत्नमाला मम परा यौवने कोऽपि नेदृशः ॥२७३॥ यौवने भोगतृष्णार्त्ताः सुता हि स्युर्वधूमुखाः । पित्रोस्त्वखण्डं विनयं विरला केऽपि कुर्वते ॥ २७४ ॥ इत्यानन्दिततातोऽयं सर्वेषु जिनवेश्मसु । महं च महिमानं च भावशुद्ध्या व्यधापयत् ॥२७५॥ उद्धार च जीर्णानि जिनवेश्मानि सर्वतः । बहुशो रथयात्राश्चाकारयद्विस्तरेण सः ॥ २७६ ॥

अथार्धरात्रे रुदितं स्त्रियः श्रुत्वा नरेन्द्रजः । कृपाणपाणिस्तत्रागात् तत्पृष्ठे च नरेश्वरः ॥ २७७ ॥ रत्नाभरणसम्भारध्वंसितध्वान्तविस्तराम् । तामुवाच कुमारश्च गुप्तोऽश्रौषीच्च तत्पिता ॥ २७८ ॥ का त्वं रोदिषि कस्माच्च सोचे ख्यातुं न युज्यते ।

अर्धरात्रौ स्त्रिया रुदनं श्रुत्वोत्थान-गमनम्

कथान-
कम् ।

रोदनकारण-
पृच्छा, पितृ-
मृत्युभया-
दग्निकुण्डे
झम्पा, स्वर्णपु-
ञ्जोपरिस्थितिः
स्वश्लाघा-
श्रवणञ्च

॥ १० ॥

त्वं तु सत्पुरुषो येनोपचिकीर्षुरिहागतः ॥ २७९ ॥ तत्तवाख्याम्यहं देवी राज्ञोऽनिष्टाच्च रोदिमि । तत्कीदृगिति तेनोक्ते सोचे सायं विनङ्क्ष्यति ॥ २८० ॥ येनास्ति योगिनीवृन्दं निखिलं मिलितं पुरः । आस्फालितडमरुकं कुर्वन् किलकिलारवम् ॥ २८१ ॥ तन्मन्त्रसाधनार्थं द्वात्रिंशल्लक्षणधारिणम् । तं होमिष्यन्ति तास्तेन दुःखेनाहं प्ररोदिमि ॥ २८२ ॥ नृरत्नं तदिदं रक्षाम्यहं प्राणै-रपि स्वकैः । न किं गृह्णन्ति मां मर्त्यमेवंलक्षणलक्षितम् ॥ २८३ ॥ सुलक्षणशरीरस्त्वं दत्से यद्यग्निकुण्डके । झम्पां तदेतद्भूपस्य दुरितं याति दूरतः ॥ २८४ ॥ प्रोचे कुमारोऽन्यस्यापि कृते सत्पुरुषा असून् । त्यजन्ति किं पुनर्विश्वबान्धवस्यास्य हेतवे ॥ २८५ ॥ यावत्परिकरं बद्ध्वा ध्यात्वा पञ्चनमस्क्रियाम् । त्राणं प्रपद्यार्हत्पादान् स कुण्डाभिमुखोऽचलत् ॥ २८६ ॥ तावन्निषेद्धुकामोऽपि नृपो देव्यनुभावतः । वक्तुं शक्तोऽभवन्नैव न च चालयितुं पदम् ॥ २८७ ॥ मा द्रक्ष्यामि कुमारस्य मृत्युमित्येष चिन्तयन् । असिधारां न्यधात्कण्ठे कुण्ठतां प्राप साधिकाम् ॥ २८८ ॥ स्थिरानाथस्ततस्तस्थौ नारकस्फारकष्टभृत् । कुमारं वीक्ष्य योगिन्यश्चक्रुः किलकिलारवम् ॥ २८९ ॥ ऊचुश्चान्योपकारैकनिष्ट[1]! झम्पात्र दीयताम् । झम्पां झटित्यदादेष स्मृतपञ्चनमस्क्रियः ॥ २९० ॥

अथात्मानमयं वीक्ष्य स्वर्णपुञ्जोपरिस्थितम् । विस्मितो योगिनीचक्रं नाद्राक्षीन्नाशुशुक्षणिम्[2] ॥ २९१ ॥ दध्यौ च किमियं माया देवो भूत्वाथ देवता । कुण्डलाभरणः प्राह तुष्टस्तेऽस्मि वरं वृणु ॥ २९२ ॥ कुमारः प्राह तुष्टोऽसि चेत्तदाख्याहि किंत्वदः । स प्राह शशंस त्वां संसदि स्वर्गिणां प्रभुः ॥ २९३ ॥ एक एव कुमारोऽत्र भुवि श्लाघ्योऽपराजितः । पित्रोर्निमित्तं यः [3]सौवप्राणानपि विमुञ्चति ॥ २९४ ॥ अश्रद्दधानोऽहमिति त्वत्परीक्षार्थमागतः । दृष्टे त्वत्साहसे मन्ये मघवानर्घ्यवागभूत् ॥ २९५ ॥

---

१ पृथिवीपतिः । २ अग्निम् । ३ स्वकीय ।

धन्यौ तौ पितरौ पुत्रो ययोर्जातस्त्वमीदृशः। जनो जनपदश्चापि ययोः स्वामी भविष्यति ॥ २९६ ॥ तं श्लाघित्वेति तत्तस्य स्वर्णं दत्त्वा च निर्जरः। अदृश्योऽभूत्कुमारस्य पित्रोर्भक्तिरवर्द्धत ॥ २९७ ॥ तत्तत्र कनकं मुक्त्वा गच्छंस्तातं ददर्श सः। ततश्चाश्लिष्य राज्ञोक्तः पुनर्जातोऽधुना सुत! ॥ २९८ ॥ कुमारः प्राह किं सर्वं तातेनैतद्विलोकितम्। नृपोऽथ स्वकृतं सर्वं तस्याख्यत् सोऽवदत्ततः ॥ २९९ ॥ तातं पातयतो दुःखे धिगस्तु मम जीवितम्। दुःखं वो यत्र मा भून्मे वासरः स कदाचन ॥ ३०० ॥ इदं तु दुष्करं चक्रे यदर्थं वित्थ तत्स्वयम्। फलत्यनेकधा युष्मद्भक्तिकल्पलता मम ॥ ३०१ ॥ इदं चित्रं तु लब्ध्वापि भक्तिकल्पलतामिमाम्। युष्मत्प्रत्युपकारेऽहमसमर्थोऽनृणो न हि ॥ ३०२ ॥ इत्थं सुतगिरा प्रीतः प्रमोदाश्रु परित्यजन्। नृपः प्राह तवाभक्तिर्न युगप्रलयेऽपि नौ ॥ ३०३ ॥ कृतार्थौ सर्वथाप्यावां भवताङ्गभुवा भुवि। यस्मै ते श्लाघते मध्येसभमित्थमृभूपतिः ॥ ३०४ ॥ प्रातर्न्यस्ताश्च ताः कोशे द्वात्रिंशत्स्वर्णकोटयः। जनो देवमिवामंस्त कुमारं स्वचरित्रतः ॥ ३०५ ॥ नृपो नृपश्रियं न्यस्य सुते व्रतधरः स्वयम्। तिमिरार्याभिधाचार्यपरिचर्यापरोऽभवत् ॥ ३०६ ॥ चिरं निरतिचारं च चारित्रं परिपाल्य सः। परिणामविशुद्धिस्थो देवो वैमानिकोऽजनि ॥ ३०७ ॥ इति पुत्रप्रभावेण जयशेखरभूभुजा। लोकद्वयसुखं प्राप्तं प्रियपुत्रास्ततः शुभाः ॥ ३०८ ॥

अपराजित-कथासमाप्तिः

**समाप्तमिदमपराजितकथानकम्।**

इति श्रीअपराजितकथानकं समाप्तम् ।